শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পরৱনজাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পৱনজাষ্টকম্ ॥

ভৱভযাঽপহং ভারতীপতিং
ভজকসৌখ্যদং ভানুদীধিতিম্।
ভুৱনসুন্দরং ভূতিদং হরিং
ভজত সজ্জনা মারুতাত্মজম্ ॥ 1 ॥

অমিতৱিক্রমং হ্যঞ্জনাসুতং
ভযৱিনাশনং ৎৱব্জলোচনম্।
অসুরঘাতিনং হ্যব্ধিলঙ্ঘিনং
ভজত সজ্জনা মারুতাত্মজম্ ॥ 2 ॥

পরভযঙ্করং পাণ্ডুনন্দনং
পতিতপাৱনং পাপহারিণম্।
পরমসুন্দরং পঙ্কজাননং
ভজত সজ্জনা মারুতাত্মজম্ ॥ 3 ॥

কলিৱিনাশকং কৌরৱান্তকং
কলুষসংহরং কামিতপ্রদম্।
কুরুকুলোদ্ভৱং কুম্ভিণীপতিং
ভজত সজ্জনা মারুতাত্মজম্ ॥ 4 ॥

মতৱিৱর্ধনং মাযিমর্দনং
মণিৱিভঞ্জনং মধ্ৱনামকম্।
মহিতসন্মতিং মানদাযকং
ভজত সজ্জনা মারুতাত্মজম্ ॥ 5 ॥

দ্বিজকুলোদ্ভৱং দিৱ্যৱিগ্রহং
    দিতিজহারিণং দীনরক্ষকম্।
দিনকরপ্রভং দিৱ্যমানসং
    ভজত সজ্জনা মারুতাত্মজম্॥ **6**॥

কপিকুলোদ্ভৱং কেসরীসুতং
    ভরতপঙ্কজং ভীমনামকম্।
ৱিবুধৱন্দিতং ৱিপ্রৱংশজং
    ভজত সজ্জনা মারুতাত্মজম্॥ **7**॥

পঠতি যঃ পুমান্ পাপনাশকং
    পৱনজাষ্টকং পুণ্যৱর্ধনম্।
পরমসৌখ্যদং জ্ঞানমুত্তমং
    ভুৱি সুৱির্মলং যাতি সম্পদম্॥ **8**॥

॥ শ্রী পৱনজাষ্টকং সমাপ্তম্॥